३५

जायेत्क्रमंकुर्यात्समयगेवंकुमारका॥ शालग्रामसमिलायांवाप्यथवावह्निमण्ड
ले॥ कन्यायांवाथवापुत्रंपूजयेद्बुमल्लांविकां॥ उन्नमायुवतीपूजाममध्यमावह्निम
ण्डले॥ शिलादिप्रथमापूजाकेममन्तन्त्विवोदितं॥ नमोन्तेनैवनाम्नावैपूजयेद्य
कुमारका॥ सर्वंसंपूजयेत्तसम्यक्पुरश्चरणकोविदः॥ द्व्यब्दंवत्रिविधंप्रोक्तंप
ञ्चायाश्चविशेषतः॥ गौडीमाध्वीचपैष्टीवगौडीचैवोत्तमोत्तमा॥ छागकुक्कु
टमत्स्यांवगतापीतिकारकं॥ त्रिकालंपूजयेद्देविंत्रिकालंपूजयेत्मनुः॥ त

च१ ग॥ ३५

घजपे १

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्यदर्शयतः शत्रुं पंडितैर्वा प्रिविदां वरैः ॥ तस्य प्रज्ञापलायं ते तत्त मः सूर्योदये यथा
॥ तमो मे दमनेकं च सर्वैराज्ञो कुमारका ॥ वह्नौ यस्य प्रविशंपं ते तत्स्य ज्ञा धूपवाम
री ॥ वगला मंत्र सिद्धस्य हृदये च प्रविशति ॥ प्रविवादि मयेतत्तं भाव हस्याति समे
पिवा ॥ प्रज्ञाकर्षणा शान्तिश्च वगला मूतनेस्मृता ॥ विद्यामाकर्षणार्थं च मे
एव च न संशय ॥ उत्तं च्य वगला मंत्र मुपवा साधनन्यधीः ॥ यत्किंचित्क्रूरतं
कर्म पथिवीजमिवांकुरे ॥ ब्रह्मचारी गृहीवा ण प्रस्थावाय दिवायतिः ॥ व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गलामंत्रसिद्धिस्तस्यापि पूज्यो मुनीश्वरैः॥ बगलामंत्रसिद्धिस्तु यत्र तिष्ठ-
ति भूतले॥ पंचक्रोशप्रमाणेन विद्या नान्या न भाषते॥ न भाषते वान्य
विद्या न स्फुरत्यथ च स्फुरेत्॥ प्रयोगं वै न लभेद्बगलाजाप्यतत्परैः॥
य स्तने सर्व्वविद्याश्च बगलास्व भूतले॥ बगलाया विना मंत्रं त्रिषु लो-
केषु दुर्ल्लभं॥ सत्संप्रदायविधिना साधयेद्बगलामुखीं॥ एवं च बग-
लामंत्रं यंत्रराजमिदं शुभं॥ ॥इति श्रीषड्विद्यागमे सांख्यायन

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तंत्रेत्रयोदशः पटलः॥ ॥सुधाब्धौ रत्नपर्यंकि मूले कल्पतरोस्तथा॥ ब्रह्मादिभिः परिवृतां वगलां भा
वये हृदि॥ क्रौञ्चभेदन उवाच॥ विरञ्चिरूपविश्वेश चिदानन्दस्वरूपक॥ वगलार्चाविधिं वै
वद मे करुणाकर॥ ईश्वर उवाच॥ सृष्टि स्थिति श्च संहारः पूजा च त्रिविधा कलौ॥ केरले
सृष्टिपूजा च गर्भकौलागमक्रमात्॥ अर्चनं क्रोडदेशे तु स्थिति मार्गं कुमारक॥ कामरूपा
गमन्नाम संहारार्चनमेव च॥ गुप्तकौलागमन्नाम गौडदेशार्चनाविधिः॥ कामरूपागमं ना
म संहारक्रम पूजनम्॥ गौडागमश्चावलं व्यासं ख्यापन मुनिस्तथा॥ उक्तवानागमश्चैव
स्थित्यर्चा शृणु पुत्रक॥ सर्वाङ्गसुन्दरीं भूयात् मां सर्वावयव भूषिताम्॥ नवोढां पुष्पिणीं चैव
था षष्ठि द्विप्र कन्यकाम्॥ कृष्णाष्टम्यां चतुर्दश्यां पौर्णमास्यां कुमारक॥ अथवा भौमवारे

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सां.तं. वा निशायां मृतुवासरे ॥ सुवासितेन तैलेन कुर्याद्‌भ्यञ्जनं तथा ॥ तूलिकातल्पमानीता आस्तीर्यो
३१ दस्मुखेषु च ॥ तस्योपरि समास्तीर्य देव मंत्रैर्जातिपुष्पकैः ॥ कर्पूरश्चैव कस्तूरीमिश्रितश्चन्द
नन्तथा ॥ सर्वाङ्गे लेपनं कुर्यात्क्लीं सक्तेन कुमारका ॥ लक्ष्मीसक्तेन कुर्यात्सदा ॥ पर्य्यंकोपरि तल्क
ल्पां चन्दनेन विलेपितां ॥ धूपवासरि मंत्रेण कुर्याद्दक्षिणतो मुखीम् ॥ उन्मुखेनार्चनं कुर्या
क्लीं सक्तेन कुमारक ॥ पादौ प्रसार्य तल्कल्पां गुप्तेनार्चनमाचरेत ॥ न्यस्य षोडशाद्य पश्चाद्देव
गलाप अरं न्यसेत ॥ कन्याश्चैव न्यसेत्त दृष्टानि च संस्पृशेत ॥ धन अय पुरश्चैव मार्जयेन्म
लविघया ॥ गंधद्वारेति मंत्रेण कुर्यात्कस्तूरिलेपनम् ॥ मूलमंत्रेण सन्यक पुष्पमालां स गुरु. ३१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मर्पयेत्॥ निवेदयेद्रव्यशुद्धिं मन्त्रेणाजमाचरेत्॥ ज्ञातं वाथ सहस्रं वा मंत्रराजमि
दं सुत॥ पुरश्चरणमध्येनु प्रतिभार्गववासरे॥ अथवा पौर्णमास्यां वा सौभा
ग्यार्चनमाचरेत्॥ प्रयोगं सिद्धिदं पुंसां मंत्रसिद्धिकरं परम्॥ एतत्पूजां वि
ना पुत्रप्रयोगं न भवेत्फलं॥ तस्मात्सर्वप्रयत्नेन प्रयोगार्थी च भूतले॥ सौ
भाग्यार्चं विना पुत्र न भवेत्कोटिजन्मनि॥ अभिमानाष्टकं त्यक्त्वा त्यक्त्वा चै
वेषणात्रयम्॥ त्यक्त्वा पंचेन्द्रियाशक्तिं सौभाग्यार्चनमाचरेत्॥ गुरवदु:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सां. त. खंसमेत्कृत्वालाभालाभौजयाजयौ॥ शीतोष्णसमताङ्कृत्वासौभाग्यार्च्चनमाच
३८ रेत्॥ बोढाह्य श्वनज्ञात्वायः करोत्यर्च्चनम्भुवि॥ पतितः सभवेत्सद्योरौरवं
नरकंव्रजेत्॥ वाह्याभ्यन्तरयोः पुनःसभेदज्ञानकम्बिना॥ सौभाग्यार्च्चनिष्क
त्तैव्यादेवताशापमाप्नुयात्॥ संकल्पश्चौ [illegible] भ्रान्तिमानसः॥ कृत्वासौ
भाग्यपूजाञ्चनोचेद्दुःखीभविष्यति॥ जितेन्द्रियमुखंत्यक्त्वाकृत्वासौभाग्य गुरुः
पूजनम्॥ सुखापेक्षेणयः कुर्याद्देवताशापमाप्नुयात्॥ [illegible] स्योवेदविधिंवै ३८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनज्ञात्वाक्रोशमेदन॥ यःकरोत्यर्चनश्चैवसविप्रःपतितोभवेत्॥ करोतिर्हिसं ग०१
क्षोभंतत्कन्यायाःकुमारक॥ भ्रान्तचित्तोभवेत्सोपिवाच्यस्पातिसमोपि[illegible]॥ नोत्पा
दयेद्वेदनाश्चशरीरमनसस्तथा॥ वेदनाञ्जनयेद्यस्तुसजनःपतितोभवेत्॥
स्वपत्नीभ्रातृपत्नीवागुरुभार्यामथापिवा॥ अर्चयेद्योवनोपेतांसांख्यायन
मतंविदम्॥ दीक्षालयस्थांरजकींकुलगेहकन्यकाम्॥ पुलिन्दकन्यकाश्चै
वम्लेच्छकण्डमतमादरात्॥ अर्चयेदृषिपत्नीचसर्वोक्तैर्लक्षणैर्युताम्॥ अर्चयेद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सा-तं. धिमार्गेण पूजा कुर्वन्ति संमता ॥ सर्वलक्षणसंपन्नां पुष्पिणीमर्चयेन्नरः ॥ मतंग
३९ मुनिनाप्रोक्तं सद्यःसिद्धिकरं भुवि ॥ सिद्धिमार्गमिदं पुत्र नास्ति सिद्धिर्मुतं विना ॥
तस्मात्सर्वप्रयत्नेनाभ्यर्चयेदात्तपातुरेः ॥ ॥ इति श्री षड्विद्यागमे सारव्याप
नतंत्रे दूतिकमकथनन्नाम चतुर्दशः पटलः ॥ ॥ पीतवर्णां मदाघूर्णां दृढ
पीनपयोधराम् ॥ वन्दे हं वग्लादेवीं स्तंभनार्थस्वरूपिणीम् ॥ क्रौञ्चभेदनउवा राम:
च ॥ राजराजसखिन् ब्रह्मन् रजताद्रिनिकेतन ॥ पंचास्त्रविद्यां वद मे स्तंभनां ३९
लां २ स्त्रं

नुपावनीम् ॥ ईश्वरउवाच ॥ आद्यस्त्वंबडवानामरणस्तंभनकारणम् ॥ उल्कामुखी
द्वितीयं च स्तंभनं भुवनत्रये ॥ ज्वालामुखी तृतीयं च स्तंभनं ऋषिदेवयोः ॥ जात
वेदमुखी चैव चतुर्थी त्वं कुमारक ॥ ब्रह्मविष्णुमहेशानां स्तंभनं नात्र संशयः ॥ हृ
रुद्रानुमुखी त्वं च पंचम न तु कुमारक ॥ षट्पंच कोटि चामुंडा काली कोटि शतं स्तु
टि त ॥ सपादकोटित्रिपुरास्तंभनार्थं च पंचमम् ॥ पंचास्त्रो ह्युत्तमं तुलं तत्प्रयोग वि
धिं तथा ॥ वक्ष्ये तस्योपसंहारं शान्तं तच्छृणु पुत्रक ॥ ॐ तारं चाविलिखेत्पूर्वं स्त

ह्लौं ह्लौं क्ष्मौं. १ पा.

सां. तं. ध्यमायां ततः परम्॥ वाराहं शक्तिधाराहं वगलामुखि मुच्चरेत्॥ ह्लौं ह्लीं ह्लूं च ततो द्वा
४० पर्सर्वदुष्टपदं वदेत्॥ नकारं दीर्घसंयुक्तं विन्दुना परिभूषितम्॥ ह्लैं ह्लौं ह्लः क्ष्मस
मुच्चार्य वाचं मुखं पदं वदेत्॥ स्तंभयद्वितयं चोक्त्वा ह्लैं ह्लौं ह्लः च ततो वदेत्॥ जि श्र ३
ह्वां कीलय उच्चार्य ततो मंत्रं पुनर्वदेत्॥ बुद्धिं विनाशयेत्युक्त्वा शक्तिवाराहमु
च्चरेत्॥ वाराहं वगलाबीजं तारं वर्मास्त्रमं पुनम्॥ रणस्तंभनवाराणं चतुर्ल्लभं रा म.
मुविमुत्तक॥ पंचाशदुत्तरं पंचबीजवद्धं सुपावनम्॥ ऋषिर्देवा च मंत्रस्य वशि ४०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ष्ठ ष्ठ न्दसां पुनः ॥ पं क्त्याख्यं देवता मंत्रे रणस्तंभनरूपिणी ॥ न्यासविद्यांच क
र्तव्यं पूर्वोक्तमंत्रराजवत् ॥ ध्यानं यत्नात्प्रवक्ष्यामि बगलामुखिदेवताम् ॥ पी
तांबरधरां देवीं द्विसहस्रभुजान्विताम् ॥ अर्द्धजिह्वां गदार्द्धं च धारयन्तीं शिवां
भजे ॥ एवं ध्यात्वा जपेन्मंत्रमर्कलक्षं सुबुद्धिमान् ॥ नालकेनहुनेल्लक्षं ब्राह्म
णान्भोजयेत्ततः ॥ गजाश्वरथसामंतकोटिकाटिवलंनलं तथा ॥ निर्वीर्यं जा
यते तत्र सद्यः शेषं पलायते ॥ प्रयोगान्ते च सम्यक् मंत्रसंस्कारमाचरेत् ॥ सं

अर्द्धजिह्वां धर्रयन्तीं मुंडमालां शिवां भजेति पाठः ४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्र ५

सां.तं. स्कारे ॥ विना मंत्रं साधकस्य प्रमादकृत् ॥ लोकालोकस्तंभनं च नाम्ना चोल्कामु
४१ खी तथा ॥ मंत्रोद्धारं प्रवक्ष्यामि सरजन्म समासतः ॥ तारं च स्तंभमायां च शक्ति
वा रीहमेव च ॥ बगलामुखी पदं चोक्त्वा सर्वशब्दं ततो वदेत् ॥ दुष्टानां पदमु
च्चार्य पूर्ववीजत्रयं वदेत् ॥ वाचं मुखं पदं चोक्त्वा पुनर्वीजत्रयं वदेत् ॥ स्तंभय
द्वितयं प्रोक्त्वा पुनर्वीजत्रयं वदेत् ॥ जिह्वां कीलय मुच्चार्य पुनर्वीजत्रयं वदेत् ॥ रामः
बुद्धिं विनाशय पुनर्वीजत्रयं वदेत् ॥ वह्निजायासमायुक्तं उल्कामुखा ४१

मुक्तकर

अयंमन्त्रः॥ पश्चाच्छाह्रूँह्रूँ श्रैंवाष्टवीजवद्धंसुपावनम्॥ ऋषिश्चयज्ञवाराहश्छ
न्दोनुष्टुवमेवच॥ उल्कामुखीदेवताचजगत्स्तम्भनकारिणी॥ वीजञ्चवगलावीजंशक्तिःस्वाहासम
न्विता॥ कीलकंशक्तिवाराहंन्यासंपूर्ववदाचरेत्॥ ध्यानंयत्नात्प्रवक्ष्यामिमन्त्रभेदाकुमारक॥ प्र
लयानलसंकाशांवीरवेशसमन्विताम्॥ वीरास्त्रयमहादेवींस्तंभनार्थंभजाम्यहम्॥ एवंध्यात्वा
५ प्र·पाठः जपेल्लक्षमनुलक्षंकुमारक॥ त्रिंपञ्चस्तम्भनंभूत्वास्वविद्यांचप्रकाशयेत्॥ तालकेनहुनेत्पुत्र
लक्षमेकंहुताशने॥ मंत्रसिद्धिर्भवेत्तस्यत्रैलोक्येकीर्तिमान्भवेत्॥ तस्याज्ञयाजगत्सर्वंस्याव

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रंजंगमात्मकम् ॥ कुमारकप्रवर्त्तिन्नेसर्वाश्वर्यकरंभुवि ॥ जीवञ्चतुर्विधञ्चैवमेतम्मन्त्रस्यजाय
ते ॥ इच्छयावर्त्ततिसर्वमाश्वर्यकरमादरात् ॥ नदीनदाश्च गिरयोनानापादपसंकुले ॥ आगच्छ
न्त्याक्षणात्तस्याःपुनर्गच्छन्तिसादरात् ॥ किन्नस्यजपयुक्तानिमाहात्म्यंचैदृशंमनोः ॥ गोप
येन्मन्त्रमेतद्धिक्रौञ्चभेदनकोविद ॥ ॥ इतिश्रीषड्विद्यागमेसांख्यायतन्त्रे अस्त्रमंत्रोद्धा
रकथनन्नामपञ्चदशःपटलः ॥ ॥ बन्धककुसुमाभासांबुद्धिनाज्ञानतत्परम् ॥ वन्देह
म्बगलान्देवीं स्तम्भनास्त्राधिदेवताम् ॥ क्रौञ्चभेदनउवाच ॥ नमस्ते गिरिजानाथमन्त्रवि
द्यागमप्रभो ॥ अधुनाअस्त्रविद्याञ्चवदमेकरुणाकर ॥ ईश्वरउवाच ॥ ताँरंवत्तमायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हैं ह्रीं हैं

ञ्चप्रासादं च ततः परम्॥ पुनश्चिरवे त्तत्व मायां प्रासादं च ततः परम्॥ वगल्लामुखिप
दं चोच्चार्य सर्वदुष्टपदं वदेत्॥ नकारं दीर्घसंयुक्तं विन्दुनापरिभूषितम्॥ वीजपञ्चकमु
च्चार्य वाचं मुखं पदं वदेत्॥ स्तम्भय द्वयमुच्चार्य पंचवीजानि चोच्चरेत्॥ जिह्वां कीलय मु
ग्मं च पंचवीजानि चोच्चरेत्॥ वुद्धिं विनाशय मु ग्मं पंचवीजानि चोच्चरेत्॥ जातवे
दमुखी मंत्रं जगदैश्वर्यकारकम्॥ अर्कपंचकवर्णेन वद्धो मंमंत्रनायकम्॥ ऋषि
कालाग्निरुद्रश्च पंक्तिश्छन्दमुदाहृतम्॥ जातवेदमुखी देवी देवता समुदाहृता॥ ॐ वी
जं चैव ह्रीं शक्ति हैं कीलकमुदाहृतम्॥ एवं वन्न्यासविद्यास्त्र ध्यानं वक्ष्यामि पुत्रक॥ जात

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सां.तं. ४३ विद्युत्संवीतदेवीं देवताप्राणरूपिणीम्॥ भजेऽहं स्तम्भनार्थं च चिन्मयीं शिवरूपिणीम्॥ एवं ध्या
त्वा जपेन्मन्त्रं त्रिंशल्लक्षं सुपावनम्॥ चर्मध्वं गद्दीनो भूत्वा चिन्तितार्थप्रदं ध्रुवम्॥ गन्धर्वा
श्चैव यक्षाश्च गरुडोरगपन्नगान्॥ वेतालडाकिनीप्रेतसाकिनीब्रह्मराक्षसान्॥ ऋषिदे
वगणांश्चैव सिद्धान्नागांश्च पुत्रक॥ मनुना स्तम्भयत्येव सत्यं शंकरभाषणम्॥ तारं च स्त
म्भमायाख्यवह्निबीजस्य पंचकम्॥ प्रस्फुरद्द्वितयं चैव तद्बीजं च त्रयोदशम्॥ वगलामुखिपद
श्चोक्त्वा वदेद्बीजत्रयोदशम्॥ सर्वशब्दं ततो ब्रूयाद्दुष्टानां च पदं वदेत्॥ बीजं त्रयोदशं चो गुह्यः ४३
क्त्वा वाचं मुखं पदं वदेत्॥ स्तम्भयद्वितयं चोक्त्वा पुनर्बीजं त्रयोदशम्॥ जिह्वां कीलय मुं चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वाहा

पूर्ववीजंत्रयोदशम् ॥ बुद्धिन्नाशययुग्मश्चपुनर्वीजंत्रयोदशम् ॥ वह्निजायासमायुक्तोज्वा
लामुखिमनुःस्वयम् ॥ इतो मंत्र एभवेद्बीजकृठोमनुःस्वयम् ॥ अत्रिश्चऋषिरेवास्यगाय
त्रीछन्द एवच ॥ ज्वालामुखीदेवताचस्तम्भनंचत्रिमूर्त्तिभिः ॥ ध्यानंयत्नात्प्रवक्ष्यामिन्या
वे॰ ४ संपूर्ववदाचरेत् ॥ ध्यानंविनाभवेन्मूकः सिद्धमंत्रोपिपुत्रक ॥ ज्वलत्सुजसमायुक्तांकाला
५ स्तंभिनी॰ पा नलसमप्रभाम् ॥ चिन्मयींवगलान्देवीम्भजेद्विधिपूर्वकम् ॥ एवंध्यात्वाजपेन्मंत्रंअ
र्कलक्षंसुबुद्धिमान् ॥ तर्पणंचगवाक्षीरंतालकेनहुनेत्सुत ॥ तर्पणंचचतुर्थ्यक्षंलक्षमे
कंहुनेत्सुत ॥ सहस्रद्वितयंचैवब्राह्मणांस्तुभोजयेत ॥ त्रिमूर्त्तिस्तम्भयेन्मंत्री पंचतत्वान्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

चकाराद्यत्रापि प्रणवोदेयः अन्यथा चतुर्दशबीजहानिमापद्येः ३

सां॰ तं॰

४४

पिक्षरणात्॥ आश्चर्यदं महामंत्रं नराणां भुवि दुर्लभम्॥ इदानीमस्त्रराजं च वक्ष्ये ह्यनुमुखीकु
पम्॥ मायात्तत्त्वमनवाणां च आश्चर्यं च कलौ युगे॥ तां रं हूं ह्रीं समुच्चार्य ल्लूं हैं ल्लौं च ततः परम्॥
ह्ः इत्युच्यते पुत्र स्रौं ह्रीं हूं च ततः परम्॥ हें हौं हूं च ततः प्रोक्ता वगलामुखि पदं वदेत्॥ आद्य
बीजं मनोः संख्यमुच्चरेत्पुनरादरात्॥ सर्वशब्दं ततोच्चार्य दुष्टानां पदमुच्चरेत्॥ वाचं मुखं प
दं चोक्त्वा स्तंभय द्वयमुत्तमम्॥ आद्यबीजं मनोः संख्यमुच्चरेत्पुनरादरात्॥ जिह्वां कीलमुच्चार्य य ५
पूर्ववद्बीजमुच्चरेत्॥ बुद्धिं विनाशयेत्युक्त्वा पूर्ववद्बीजमुच्चरेत्॥ वह्निजायां समायुक्तो ह्यद्वस्त्रा गुरुः
त्रमुखीमनुः॥ महामन्त्रमयं देवी चतुश्चशताक्षरी॥ सविता च ऋषिः प्रोक्तो गायत्री छन्द एव च॥ ४४

पंचोना ८ पाठः १

देवतु स्तंभनास्त्रं च वृहद्भानुमुखी तथा ॥ बीजं च वगलाबीजं शक्तिर्मायाकुमारक ॥ कील
कं प्रणवं चात्र विनियोगं च संस्मृतम् ॥ पूर्ववन्न्यासविद्यां च मंत्रराजवदाचरेत् ॥ ध्यानं पत्ला
त्र वक्ष्यामि मंत्रभेदेन पुत्रक ॥ कालानलनिभां देवीं ज्वलत्पुंजशिरोरुहाम् ॥ कोटिवाहुसमा
युक्तां लोलजिह्वासमन्विताम् ॥ स्तंभनास्त्रमयीं देवीं दृढपीनपयोधराम् ॥ मदिरामदसं
युक्तां वृहद्भानुमुखीं भजे ॥ एवं ध्यात्वा जपेन्मंत्रमर्कलक्षं कुमारक ॥ तर्पयेत्तद्दशांशं च गुडो
दकसमन्वितम् ॥ नालकेनरुनेत्तस्य दशांशं संस्कृताग्निना ॥ ब्राह्मणान्भोजयेत्पश्चात्तद्द
शांशं कुमारक ॥ मंत्रान्ते च प्रकर्तव्यं सौभाग्यार्चनमाचरेत् ॥ सौभाग्यार्चं विना पुत्र मंत्रसिद्धि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नैजायते॥पंचास्त्रमंत्रसिद्धिर्हि दिवि देवेषु दुर्लभा॥ गोपयेत्सर्वदा पुत्र गुप्ता वीर्यवती भवेत्
॥ न कर्त्तव्यं प्रयोगोस्य शापदोषादिकदाचन॥ यः करोति प्रयोगं च देवताशापमाप्नुयात्॥ ॥
इति श्रीबगुद्धागमे शास्त्याचनतंत्रे अस्त्रमंत्रोद्धारकथनं नाम षोडशः पटलः॥ ॥
जिह्वाग्रमादाय करेण देवी मुत्पाटयन्ती मुरुशक्तियुक्ताम्॥ पीताम्बरा पीनपयोधराढ्यां
सदा स्मरे हं वगलां विकां हृदि॥ क्रौंचभेदन उवाच॥ चन्द्रचूड नमस्तुभ्यमिन्दिरापतिपूज
जित॥ शताक्षरी महामंत्रं वगलायाश्च मे वद॥ ईश्वर उवाच॥ मंत्रोद्धारं प्रवक्ष्यामि पु
रश्चर्याविधिस्तथा॥ प्रयोगं चोपसंहारं वक्ष्येहं नव पुत्रक॥ साध्य मौयाच वाग्वीजं मा
जिह्वाग्रमादाय करेण देवीं वामेन शत्रून् परिपीडयंतीं॥ गदाभिघातेन च दक्षिणेन पीतांबराढ्यां द्विभुजां नमामि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्रीं क्लीं श्रीं ह्सौं

आमन्मथमेवच ॥ श्रीवीजं शक्तिवाराहं वगलामुखिमुच्चरेत् ॥ स्फुरद्वयं तथा चोक्त्वा सर्वदुष्टान् ततो वदे
त् ॥ दुष्टानां पदमुच्चार्य वाचं मुखं पदं वदेत् ॥ स्तम्भय पदमुच्चार्य प्रस्फुरद्वयमुच्चरेत् ॥ वि
कराङ्गि पदं श्चोक्त्वा घोररूपि पदं वदेत् ॥ जिह्वां कीलय मुच्चार्य महत्क्रुद्धं ततोच्चरेत् ॥
पश्चाद्भ्रमकरीत्येवं बुद्धिं विनाशय उच्चरेत् ॥ विराण्मय पदं चोक्त्वा सर्वप्रज्ञामयीति च ॥
प्रज्ञान्नाशय उच्चार्य उन्मादिकुरुयुग्मकम् ॥ मनोपहारिणीत्युक्त्वा सन्ध्यामायां समु
च्चरेत् ॥ शक्तिवाराहं वीजं च लक्ष्मीवीजं ततोच्चरेत् ॥ कामराजं च हल्लेखां वाग्भवं तदनन्त
रम् ॥ सन्ध्यामां ततोच्चार्य वह्निजाया(स्वाहा)समन्वितम् ॥ शताक्षरी महामंत्रं वगलानामम

सा·तं

४६

वनम॰ ब्रह्मात्रऋषिश्छंदोस्य गायत्री समुदाहृता॥ देवता वगलानाम्नी जगत्स्तंभ
नकारिणी॥ ह्लीं वीजं शक्तिरित्येवं वाग्भवं कीलकं तथा॥ पूर्वोक्तन्यासविद्यां च व
गलापंजरादयः॥ न्यसेदुक्तक्रमेणैव जपादावंत्य एव च॥ पीतांवरधरां सौम्यां पी
तभूषणभूषितां॥ स्वर्णसिंहासनस्थां च मूले कल्पतरोरधः॥ वैरिजिह्वां भेदनार्थं
छुरिकां विभ्रतीं शिवां॥ पानपात्रं गदां पाशं धारयंतीं भजाम्यहम्॥ एवं ध्यात्वा
जपेन्मंत्रं कर्मलक्षं सुपावनं॥ तर्पयेद्भूमिभेणवारिणावाथपुत्रको॥ जातीचंप

राम:

४६

३।

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कसंमिश्रजलेनचकुमारका॥पूजायुतंचसंतर्प्पत्वर्च्चितेनजलेनच॥त्रिमध्वक्तपायसे
नअथवापायसाज्ययोः॥चरुणावाकुनेत्सुत्रपर्यायफलदायकम्॥सर्षपेनकुनेत्सु
त्रसहस्रंतत्वसंख्यया॥नानादेहजरोगांश्चक्षुत्तिमग्रहसंभवान्॥चंपकांश्चप्रयो
गांश्चशलधान्तुसमुद्भवान्॥सद्यो नाशसमायान्तिमंत्रहोमेनसाधकैः॥शालि
शाकुघनाक्तंचशामन्तकुसुमेनवा॥षट्सहस्रंकुनेत्सुत्रस्थंडिलेवाथकुंडके॥
वशीकरणसंमोहंकीर्त्तिःप्रज्ञाभवेद्ध्रुवम्॥तालकेनकुनेत्सुत्रसहस्रंवसुसंख्यया
॥कुण्डेचैवभगाकारेरजकाग्नौकरौनिशा॥स्तंभनंचभवेत्सुत्रनात्रकार्याविचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बहेडा २

सां. तं. रणाः॥ अर्कैश्च पिचुमर्दैश्च समिधैर्होमयेत्ततः॥ प्रत्येकं त्रिसहस्रेश्च प्रदेशास ततः क्रमात्पणमं
४१ त्रंसर्वसमुच्चार्य समिधद्वयमेव च॥ ध्यानेध्यानसमायुक्तः सद्योविद्वेषणं भवेत्॥ विभीतक
स्य समिधो ज्ञात्वा सुत्रिसहस्रकम्॥ पक्को णकुण्डे जुहुयां निशायां कृष्णपक्षके॥ श्म्या
नांश्च गिरीश्चैव नदी पादप संकुलान्॥ क्षणादुच्चाटनं कुर्यात्तद्धोमस्य प्रसादतः॥
निम्बतैलेन संयुक्तं शाल्मलीकुसुमं तथा॥ जुहुयाद्दैवतं ध्यायन्मारणं भवति ध्रुवम्॥
सि२ षद्कर्मनिर्माणमिदं सुसिद्धं दशताक्षरी मंत्रमन्त्रदोषदुःसहम्॥ होमेन संस्तंभनमाचरेद्बु रामः
धो विद्यासु सिद्धं सुनिगुह्यमादरात्॥ ॥ इति श्री बग्लि घागमे सांख्यायन तंत्रे सप्त ४१

सु३

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वागेदेवतास्वरूपिणीम्· पाठः २

मदशः पटलः॥ ॥नमस्तेजगतांदेवींजिह्वास्तंभनकारिणीम्॥भजेहंशत्रुनाशार्थंसुंदीपासक्तमानसाम्॥श्रीभैरवउवाच॥सत्यज्ञानमहेशाननित्यानित्यस्वरूपक॥चन्द्रचूडनमस्तेस्तुप्रयोगंवदमेप्रभो॥ईश्वरउवाच॥षट्सहस्रंहुनेत्सुरदुर्वाहोममतन्द्रितः॥सद्यस्तापज्वरंहंतिवगलायाःप्रसादतः॥कुशेनजुहुयात्तापभीरुज्वरहरंपरम्॥हुनेत्तावत्त्वेतदुर्वांज्वरंचातुर्थिकंहरेत्॥त्रिमध्वक्तस्वेतदुर्वांषट्सहस्रंहुनेत्क्रमात्॥नानाविधज्वरंहंतिनात्रकार्याविचारणा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सां.तं.
४८

दधिमिश्रगुडूचीं तु शर्करागुडसंयुतम् ॥ जुहुयात्षट्सहस्रं तु नानामेहनिवारणम् ॥
सर्षपं लवणोपेतं पूर्ववज्जुहुयान्नरः ॥ नाशयेद्गुल्मरोगन्तु औषधेन विना महा-
न् ॥ षट्सहस्रं हुनेत्पुत्र शर्कराज्यसमन्वितम् ॥ पैत्त्योइकादि सर्वांश्च रोगान्ना-
शयते ध्रुवम् ॥ शालिसक्तु घृताक्तेन वशीकरणमाप्नुयात् ॥ लाजाहोमं षट्सहस्रं
लभेद्वाञ्छितकन्यका ॥ हरिद्राखण्डहोमं तु षट्सहस्रं तु बुद्धिमान् ॥ गर्भस्तम्भो
भवेन्नारी सापि वंध्या भवेद्ध्रुवम् ॥ केतकीदलहोमेन गणिकां वशमाप्नुयात् ॥ हुनेत्स[illegible]
दले नैव नेत्ररोगं विनश्यति ॥ मक्षिकाकु[illegible]वेत् ॥ जातीपल्ले

गुरुः
४८

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्जुहुयादुन्मत्तोजायतेरिपुः ॥ षट्सहस्त्रं देवकुसुमंशर्करान्यसमन्वितम् ॥ उद्वेगंचैववाञ्च
ल्यंउच्चाटनमतिस्तथा ॥ अविवेकंस्तुदुर्मतिर्बुद्धिःसुरुद्बुद्धिमान् ॥ तत्क्षणान्नाशमाप्नोति
तमःसूर्योदयेयथा ॥ मांसंसंपुटसंयुक्तंद्रवेणसममेवच ॥ अयुतंहोमयेद्धीमान्सद्यो धनपति
र्भवेत् ॥ मध्वक्तंछागमांसंचत्रिसहस्रंहुनेत्सुत ॥ भूलाभंचभवेच्छीघ्रंग्रामादिपतिरेवच ॥
गोडीद्रव्येणजुहुयात्सहस्रंवाणसंख्यया ॥ गुत्ररोगांश्चविविधान्नाशयान्निनशंसयः ॥ मा
ध्वीद्रव्येणजुहुयात्षट्सहस्त्रंक्रमेणतु ॥ ज्वर[illegible]दिपैत्यादिरोगांश्चसद्योनाशनमा
प्नुयात् ॥ पैष्टीद्रव्येणजुहुयान्निशायांषट्सहस्त्रकम् ॥ संग्रहग्रैणीरोगंसद्योनाशनमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सां॰तं॰
४९

प्नुयात्॥ अन्नेन वाघृतं हुत्वा ह्यन्नदानपतिर्भवेत्॥ घृतेन कान्तिमान्पुंसां नारीणां मन्मथो भवेत्॥ क्षीरेण श्रमनाशः स्याद्धातापननाशनम्॥ पञ्चगव्येन जुहुयात्सर्वं वश्यापत्तये॥ गोमूत्रेण हुनेत्पुत्र षट्सहस्रं क्रमेण तु॥ विहारणे कोपभवे ह्निपुश्रान्तो भविष्यति॥ तालीद्रव्येण जुहुयात्स्त्रीणामाकर्षणं भवेत्॥ खर्जूरेण तु द्रव्येण पुंसामाकर्षणं भवेत्॥ तिलतैलेन जुहुयात्सर्वाकर्षणमाप्नुयात्॥ एरण्डतैलहोमेन वाचाकर्षणमाप्नुयात्॥ कुसुंभतैलेन पूर्ववद्धोममात्रतः॥ जलजाश्चैव ये भेदा भवेदाकर्षणं सुत॥ करंजवी

होमे॰१

गुरुः
४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

जतैलेन काकस्य ध्मानेनैकशः॥ आकर्षणम्भवेत्क्षीघ्रं खेचराः पक्षिजातयः॥ यावज्ज्वालान्तहोमेनअ
ग्निमांद्यो भवेद्रिपुः॥ रोगी च जायते मांच्छिव वस्य वचनं यथा॥ जुहुर्यदा रनालेन पैत्यरोगी
भवेद्रिपुः॥ निंबपत्रद्रवेणैव वातरोगी भवेद्रिपुः॥ मोहिनी पत्रजद्रावैः श्लेष्मरोगी भवेद्रिपुः॥ अ
र्कपत्रद्रवेणैव क्षयरोगी भवेद्रिपुः॥ वज्री क्षीरेण संयुक्तमारणाले तु पुत्रक॥ जुहुयात्सद्दस
हस्रनुवगलाध्यानपूर्वकम्॥ नाडीव्रुणसमायुक्तः षण्मासान्म्रियते रिपुः॥ गरंच तिलतै
लं च आरणालं च पुत्रक॥ ग्रामे वा नगरे वाथ वगलाध्यानपूर्वकम्॥ स्फोटव्रुणाश्च जायन्ते रि
पोर्योजनमात्रतः॥ यस्मिन्नात्र न सन्देहः शिवस्य वचनं यथा॥ तिलतैलेन संयोज्य यावज्ज्वा

सां.तं.

५०

लान्नमेव च ॥ जुहुयात्सर्ववस्तुन्नमष्टोत्तरात् द्विषुनाशनम् ॥ कर्पूरं मिलितं चैव तिलतैलं हुनेत्सुधीः ॥
मारणम्मण्डला ब्रह्मो न्नोत्रकार्याविचारणा ॥ ॥ इति श्रीषट्विद्यागमे सांख्यायनतं
त्रे जम्भदशः पटलः ॥ ॥ चतुर्भुजां त्रिनयनां पीतवस्त्रधरां [illegible] ॥ भजे हं जगतां देवीं
शत्रुस्तंभनकारिणीम् ॥ क्रौंचभेदन उवाच ॥ नमस्ते योगिसंसेव्य नमः कातरशिक्षो नम ॥
प्रयोगं चोपसंहारं वद मे सर्वमंगल ॥ ईश्वर उवाच ॥ प्रेतांगारमसी कृत्वा प्रेतवस्त्रेण बुद्धिमान्
॥ शाल्यं तदन्तरे तस्य वैरिनाम च संलिखेत् ॥ एकाक्षरी च वगला वेष्टयेत्समयागदरात् ॥ शनाक्ष
रं च सर्वे वेष्टयेत् ईशानादि द्विषु वेष्टयेत् ॥ नद्धस्तं गुलिकीकृत्य वेष्टयेत्प्रेतरज्जुना ॥ भौमवारे स्मशाने पश्चा
न पेद्धस्तकोटरे ॥ वृक्षस्य लेखयेन्मन्त्रं अयुतं ध्यानपूर्वकम् ॥ पुत्रदारादिसंयुक्तः पक्षात् क्षयं तु मे नाम

गुरुः

५०

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेत्॥ भूर्जपत्रेलिखेन्नामवगलाबीजमध्यगम्॥ कोटरेस्थापयेत्तत्रविभीतकतरोस्तथा॥ जि
ह्वास्तंभोभवेच्छत्रोः पक्षमात्रेणपुत्रक॥ बृहस्पतिसमोवापिवाचस्पतिसमोपिवा॥ तालप
त्रेलिखेन्नामवगलाबीजमध्यगम्॥ प्राणप्रतिष्ठांकृत्वातुनिर्दहेद्दीपवह्निना॥ जपेत्त
त्रसहस्रैकंशताक्षरमनुंतथा॥ जिह्वास्तंभोभवेच्छत्रुर्घुंशोघोभाषापतिस्त्वयम्॥ प्रेत
सा ५ भाण्डेलिखेन्नामप्रेतांगारेणसाधकः॥ प्राणःस्थापनकंकृत्वारवौरात्रौसुबुद्धिमान्
॥ प्रेताग्नौप्रेतकाष्ठेनतुनिर्दहेत्प्रेतकानने॥ नग्नःश्मशाननिलयोजपेद्दक्षिणादि
ङ्मुखः॥ सहस्रंध्यानपूर्वंतुप्रातर्यामेसमापयेत्॥ एवंकृत्वातुसप्ताहंज्वरस्थोजा
यतेध्रुवं॥ मासान्मृत्युवशोभूत्वाविनश्यतिनसंशयः॥ श्मीरक्केमार्जनेनैवत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धत्तूर पत्र: ९

९२

मंत्रेणाभिमंत्रितम्॥ शतमष्टोत्तरं चैव सहस्रं वा कुमारक॥ मोहिनीपत्रजद्राव मर्दे
येल्लेक्ष्यणतो नघ॥ समंसमं रिपुं क्षत्वा कल्पयेन्मर्दयेत्पुनः॥ चतुरंगुलपुत्तल्यं कु
र्यात् सर्वांगसंयुतम्॥ हरितन्नामसंलिख्य ललाटे वगलां लिखेत्॥ सर्वांगे चाजिन
वीजं लिखेत् ह्रिं ढुं च निर्दहेत्॥ प्रेतवृक्षोत्थे प्रेतकाष्ठे प्रेतमांसं तु उत्तके॥ जपेत्तत्त्वा युत

व

त्रं रिपुर्गच्छे यमालयम्॥ अर्कक्षीरेण लंपुक्तं मर्दयेत् स्तु नमर्पये:॥ चतुरंगु
लपुत्तल्यां लिखेत् स्वर्ववदाचरेत्॥ स्थापयेत्तु त्यधोभाण्डे यमकण्टकयोगतः

॥ तस्योपरि दिवा रात्रो अग्निं संस्थाप्य बुद्धिमान्॥ वगलावीजमध्यस्थं साध

सुशानकेशीरमयु कम पा८: ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नामचसंलिखेत्॥वेष्टयेद्गगलामंत्रं शाल्याद्विग्नाताक्षरम्॥प्राणप्रतिष्ठांकृत्वातु
संहारक्रमतोर्चयेत॥शताक्षर्या ह्रीं क्षीरैस्तुस्तुहीक्षीरेणलेपयेत्॥संतपेद्दीप
शिखयापुनर्लिप्यात्तुसंतपेत्॥एवंकृतेष्टान्तरशतंशताक्षर्यासुधिंजपेत॥
एवंकृतेसप्तरात्रंसशत्रुर्भस्मतोभवेत॥मसूकाज्वराशकः पश्चाद्गुडूच्छेघमा
लयम्॥मंत्रमेतल्लिंवपत्रेएयमेवंक्रमंक्रमम्॥चतुःप्रस्तारमंत्रेणशीतलावि
घयातथा॥सपर्णाछिरयेद्दीरैःसप्ताहाच्छांतिमाप्नुत॥तिक्तकोशातकीजा
तितंपिच्छीसादरंतथा॥धुत्तूरकंचतन्मूर्छिकारवल्यांकृतिम्॥षट्दलान्ति

मनुं·पा·३

रीं४

दला१

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वजांश्चैवकुर्यात्तास्दयंतथा॥ बदरीमूलतोगलात्प्राणस्थापनकंचरेत्॥ मंत्रमुच्चा
रयेत्सुत्रंतदन्तेशत्रुमुच्चरेत्॥ ---------------------- ॥ श्रोत्राक्षिगंडभ्रूमध्येजिह्वानासास्य
मेवच॥ ---------- वगलात्तपुटहृये॥ ब्रुलस्थानेतालुदेशेकंटकानर्कसंख्यया॥ दक्षि
णाभिमुखोभूत्वारोपयेन्नमन्तारवौ॥ पंचपंचकरेरोप्य पार्श्वयोःकुक्षौचपृष्ठके॥ ४४
कंटकान्सप्तसंख्याकान्रोपयेन्मंत्रपूर्वकम्॥ रोपयेत्सादरंमुमेतुमस्तकेकंरादशं
तथा॥ मंत्रपूर्वंचसंरोप्यबदरीकंटकान्तथा॥ पुत्तलींप्रेतवस्त्रेणबध्वाशूद्रेशग
र्तके॥ स्मशानेनिक्षिपेज्जात्वोबलिंदद्याच्चकुंकुमम्॥ अष्टमर्पदंरिपोर्गेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

डीस्सलंभेद्ध्रुवम्॥तेनैवदुःखशत्रुश्चपक्षाञ्छेद्यमालयम्॥वक्ष्येहंचोपसंहारंजीवस्योपरिपुर्व
था॥रवौशगौवलिंदत्वाचानीत्वासाधकोत्तमः॥उत्पाद्यकंटकाण्याद्यैक्षीरेणक्षालयेत्सुत॥
तथ्यलारंचसंक्षाल्यनिःक्षिपेत्कूपमध्यमे॥निःक्षिपेन्मन्त्रपूर्वन्तुएकैकंचोत्तरामुखम्॥क्षा
लुवेनैवमंत्रेणमंत्रयेत्कलशोदरम्॥सहस्रवारंविधिवन्मंत्रितंवारिभिःक्रमात्॥प्रयोगंपीडि
तंतेनमार्जयेच्छालुवेनतु॥स्थापयेत्तेनमंत्रेणमंत्रसिद्धिस्तुपुत्रक॥ताम्रपात्रेनदीतोयं
नदीवेगाद्ववेष्ठितः॥तस्मिंश्चमंत्रयेच्छाल्वमंत्रेणैवशतंशतम्॥त्रिकालंप्राशयेत्तोयमध्याह्न
मार्जनन्तथा॥त्रिदिनंवाथवापंचऋषिसंख्यादिनेपुनः॥एवंकृतेपीडितस्यपीडांसूर्योद
येतथा॥संहरेच्छान्तिमाप्नोतितमःसूर्योदयेयथा॥नज्ञात्वाचोपसंहारंयःकरोतिनराधमः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सां.तं. ५३

लौ

सजीवन्नेव चात्योन्मत्तः स्तौनो भविष्यति ॥ प्रयोगं चोपसंहारमभ्यसेच्च कुमारक ॥ ॥इति
षड्विधागमेसारव्यापनतंत्रे एकोनविंशतिः पटलः ॥ ॥ सर्व्वविपक्षोभाद्यां समपीनपयो
धराम् ॥ हृदि संभावयेद्देवीं बगलां सर्वसिद्धिदाम् ॥ क्रौंचभेदन उवाच ॥ नमस्ते पार्वतीनाथ
नमः पन्नगभूषण ॥ परविद्याभेदनं च बगलायाश्च मे वद ॥ ईश्वर उवाच ॥ मंत्रोद्धारं प्रवक्
ष्यामि मंत्रसंघट्टनाविधिम् ॥ प्रयोगं चोपसंहारं शृणु सर्वं कुमारक ॥ उद्धरेत्तारमादौ तु
त्तध्रुमां यां ततः परम् ॥ श्रीमायाशक्तिवाराहं वाग्भवं मन्मथं तथा ॥ मंत्रिरवे नाक्ष्यवीजं चव
गलांवीजमुच्चरेत् ॥ परप्रयोगमुच्चार्य ग्रसयुग्मं ततः परम् ॥ पूर्वन्नववीजं च बगलास्यपदमुच्च
रेत् ॥ रूपिणीपदमुच्चार्य परविद्यापदं वदेत् ॥ ग्रसिनीतिपदं चोक्त्वा भक्षाद्वितयमुच्चरेत् ॥ पूर्वन्न

क्रौंद
रामः
५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ववीजंच परप्रज्ञापदं वदेत् ॥ हारिणीति पदं चोक्त्वा प्रज्ञां खाहि युगं वदेत् ॥ पूर्ववन्नववीजं चवगला
मुखिउच्चरेत् ॥ रूपिणीपदमुच्चार्य बुद्धिं नाशय युग्मकम् ॥ पंचेन्द्रियपदं चोक्त्वा ज्ञानं भक्षद्वयं वदेत्
॥ पूर्ववन्नववीजं चवगलामुखिउच्चरेत् ॥ हूं फट् स्वाहा समाप्तौ वगलामंत्रमुत्तमम् ॥ शतोत्तरं मंत्र
वीजं अष्टाविंशतिरेव च ॥ ब्रह्मा ऋषिश्च छन्दोस्य गायत्री समुदाहृता ॥ परविद्याभक्षिणी चवग
ला देवता स्वयम् ॥ अत्र प्रयोगं वक्ष्यामि मंत्रस्यास्य कुमारक ॥ पाशांकुशेनांतरितशक्तिवीजेन वि
न्यसेत् ॥ तन्महामायाश्वरीवीजेस्तद्वत्तुवीजतां न्यसेत् ॥ लघुसोढां च विन्यस्य क्रमादेवकुले
श्वरीम् ॥ ध्यानं यत्नात्प्रवक्ष्यामि कौं च भेदनकोविद ॥ सर्वमंत्रमयीं देवीं सर्वाकर्षणकारिणीम्
॥ सर्वविद्याभक्षिणीं च भजेहं विधिपूर्वकम् ॥ एवं ध्यात्वा जपेन्मंत्रं लक्षमेकं सुपावनम् ॥ तर्पये

स्ववीजं ततो ३ पा·

त·३

सां·तं· दास्यवेनैव नहृसांशंकुमारक॥छागमांसेनजुहुयात्मध्वाज्येनसमन्वितम्॥खंडमामलकंपू
५४ क्षंअयुतंचकुमारक॥योगिनीवीरपूजांचस्राचरेञ्चसमादरात्॥मंत्रसिद्धिर्भवेन्नत्रनात्रका
र्यविचारणा॥यस्त्रुयोगकालेषुमंत्रमेतंकुमारक॥सहस्त्रार्चितपंजप्त्वामरुत्तुरवाशीघ्रमिति॥
शत्रवध्वस्तुरश्मयोतत्रविघ्नंप्रजापते॥यत्रकुत्रापिरिपवस्तपःकुर्वन्तिनिष्फलान्॥तत्राघु
तंजपेन्मंत्रंग्रसतेपरविद्यया॥अयुतान्तस्यमंत्रंचअरिमंत्रफलंभवेत्॥द्रव्याभिमानिनो नि
येचयेचाविद्याभिमानिनः॥रूपाभिमानिनोयेचयेचयौवनमानिनः॥यत्रकुत्रापिति
ष्ठन्तिमंत्रमेनंकुमारक॥परविद्याभक्षणार्थंमंत्रंचैवायुतंजपेत्॥श्वेतकेशासमान्ति ०या नमः
दन्तभ्रन्याभवेद्द्विजः॥सद्योयौवनहीनंचतमःसूर्योदयेयथा॥रूपवान्कुणरोगीचभ ५४

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वत्येवन संशयः ॥ जात्याभिमानिनो येच निन्दको भवति ध्रुवम् ॥ तपोभिर्मानिनो ये च ये च रूपा
भिमानिनः ॥ अंगहीनोभिजायन्ते नागकार्याविचारणा ॥ वैदिकंच परित्यज्य विपरीत कृतम्भ
वेत् ॥ विद्याभिमानिनः सर्वे अभुतं जपमाचरेत् ॥ भवेद्विद्या विहीनोपि मुष्करो भवति ध्रुवम् ॥
देहाभिमानि पुरुषान ष्ट द्रव्यो भवेद्ध्रुवम् ॥ दौर्भाग्येन समायुक्तः सर्वसंमोहनम्भवेत् ॥ स
तन्मंत्रस्य माहात्म्यं न जानन्ति कुर्यात्प्रवराः ॥ सर्वश्चेदं हजमिदं स्वप्रभावप्रकाशिनीम् ॥
स्तोच ६ योगाभ्यासे योग सिद्धिस्तप सिद्धिस्तपस्विनः ॥ मंत्रेण सिद्धोपि यत्र प्रतिष्ठति च पुत्रक ॥
परविद्या भेदनं च मंत्रोपासन तत्परः ॥ यत्र गत्वा समासेन एतन्मंत्रायुतं जपेत् ॥ तत्राज्यं च
समासेन अंवा सेवापरो भवेत् ॥ नतत्समाधिको भूयान्नैव द्वेषकरो भवेत् ॥ नैव निन्दा
योगसिद्धौ मंत्रसिद्धौ तपस्वी तपजीवनः ॥ भेदाकांतो भवेन्नीचो निन्दकोपि भवेद्ध्रुवम् ॥ यस्तन्मंत्रराजं च नित्यमष्टोत्तरं जपेत् ॥ २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सां.तं. करोम्यायद्दिष्टे यत्त्वजीवितुम्॥ ॥इति श्रीषड्विद्यागमे सांख्यायनतंत्रे विंशतिः पटलः॥ ॥
५५ परप्रज्ञापसंहारीं परगर्वप्रभेदिनीम्॥ परविद्याभक्षिणीं तां वगलां हृदि भावये॥ ॥क्रौंच
भेदन उवाच॥ नमस्ते योगिसंसेव्य योगराज नमो नमः॥ परविद्याकर्षणं च त्र योगं वद शंकर॥
ईश्वर उवाच॥ शिष्व मेतत्प्रक्रिमयं तत्प्रक्रिर्वगलामयम्॥ एकत्र भासमानानां तां वगलां च कु
मारक॥ वाङ्मयं चैव वैचित्र्यं त्रिषु लोकेषु वर्त्तते॥ तत्सर्वहरणार्थं च विद्यामेतां कुमारक॥ मनसा
तु जपेन्मंत्रं मुखं तस्यावलोकयेत्॥ भयं च विस्मृतिर्भ्रांतिस्तत्क्षणात्कुरुते ध्रुवम्॥ पानप
त्रं वैरिजिह्वां गदां मूलेन संयुताम्॥ पीतवर्णां महाघूर्णां चिन्तयेदानने रिपोः॥ स तु भाषाप रामः
तिः साक्षाद्बृहस्पतिरपि स्वयम्॥ स तु जाड्यतमो भूत्वा निन्दितो भवति ध्रुवम्॥ अत्र श(५५

ना १

स्त्रमयं मंत्रं योजातिकुमारक ॥ तत्र गत्वा महामंत्रं जपेदिदमनन्यधीः ॥ त्रिसहस्रं ध्यानयुक्तं तस्य विघ्नो
कुमारके ॥ विस्मृतिश्च भवेत्क्षिप्रं नागकार्या विचारणा ॥ अयं तैश्चर्यसंयुक्तो देवतो वर्त्तते यदि
॥ तस्य गेहं भौमवारे निशि नग्नेन बुद्धिमान् ॥ प्रदक्षिणत्रयं कृत्वा निक्षिप्त कोवेरदिङ्मुखः ॥
वे ४ सहस्रं सप्तरात्रं च नष्टद्रव्यो भवेद्ध्रुवम् ॥ ग्रामं वा नगरं वाथ नित्यं कृत्वा प्रदक्षिणम् ॥ जपेदयुतसंख्याकं
तन्नाम च कुमारक ॥ तस्यादिभिर्विनश्यन्ति द्रव्यं वो रैरागनश्यति ॥ म्रियन्ते रिपवः पुत्र मासाद्वै भग्नमा
प्नुयात् ॥ फलितं पुष्पितं चैव वृक्षं ज्ञोरारामं माश्रितः ॥ रवौ रात्रौ निशाकाले नग्नो भूत्वा सुनिश्चलः ॥ प्र
दक्षिणात्रयं कृत्वा प्ययुतं जपमाचरेत् ॥ वृक्षं निर्मूलमाप्नोति शिवस्य वचनं यथा ॥ एकाक्षरी च वर्गला
साध्य नाम समध्यतः ॥ चित्तयेद्वाध्यकालेन सहस्रं जपमाप्नुयात् ॥ लक्षं कृत्वा मनोरेवं मृत्तिकां च कु
मारक ॥ प्रवाहे परिनिःक्षिप्य नद्याः परि बुद्धिमान् ॥ स्तंभयेत्तं नदी वाहं सहस्राश्चर्यकारकम् ॥ म

सं.तं. स्नानघामेवमेनं कुर्य्यात्तद्रुहलाघवात् ॥ व्यालव्याघ्रादयश्चैव येये क्रूरमृगादयः ॥ त्रिसप्तमं
५६ त्रितं मस्यमूर्द्ध्नि रोपणमाचरेत् ॥ वाक्पाणिवदनोक्षणं च तत्क्षणात् स्तंभनं भवेत् ॥ मंत्रयेत्सं
स्कृतं भस्म मंत्रेणानेन पुत्रक ॥ अग्नेर्नरस्यतं सम्यक् ध्यानं एवं गणबुद्धिमान् ॥ सर्वाङ्गोद्धूल
मा ४ नं कुर्यात्तद्भस्मनाकोरक ॥ वने चरास्तामसजंतवश्च चोरादिदुष्टमेकदेत्यहानपि ॥ प्रेता
श्च भूताश्चापिशाच भूचराः सिंहाश्च संस्तंभयति ध्रुवं च ॥ एतन्मंत्रवरं पुत्र मनसा जपमाचरे
त् ॥ वादार्थं चाथवा निजसभायां राजसन्निधौ ॥ गत्वा तु जपतः सर्वे जिह्वास्तंभनमाप्नुयुः ॥ शत्रुमु
द्दिश्य मंत्रं च सफलं प्रजपेत्ततः ॥ पक्षमात्राद्भवेच्च जोजिह्वास्तंभनमाप्नुयात् ॥ नैवाग्निर्यते शत्रु
मण्डलाईनमानवः ॥ दक्षिणामूर्तिमंत्रेणामंत्रितं जलमादरात् ॥ त्रिकालं चैव पीत्वा तु मंडलात्सु त.मः
न्निमाप्नुयात् ॥ ॥ इति श्री षड्विद्यागमे सांख्यायनतंत्रे स्पक विंशतिः पटलः ॥ ॥ नमस्ते देवदे ५६

वैरिणां जिह्वां स्तम्भनकारिणीं॥ पानपात्रगदायुक्तां भजेहं वगलामुखीम्॥ ॥क्रौंचभेदन उ
वाच॥ ॥त्रिपुरारे त्रिकालज्ञ त्रिकालात्म त्रियम्बक॥ वगलास्तवं वदास्माकं मयि वात्स
ल्यगौरवात्॥ ॥ईश्वर उवाच॥ वगलास्तोत्रमिदं पुत्र सुरासुरसुपूजितम्॥ अगस्त्य
श्चोक्तवान्पूर्वं रामं दाशरथिं प्रति॥ तेनोक्तमार्जुनेयाय तेनोक्तं चार्जुनं प्रति॥ तद्विद्यां
प्रवक्ष्यामि वगला हृदयं मनुम्॥ प्रथमं वगलाबीजं वाराहं तदनन्तरम्॥ तत शा ख ५
क्तिवाराहं वगलाबीजमुद्धरेत्॥ वगलामुखि पदं चोक्त्वा मम शत्रून्स्तं वदेत॥ ग्रस
द्वयं समुच्चार्य स्वाहियुग्मं ततः परम्॥ भक्षयुग्मं ततोच्चार्य शोणितं पिब युग्मकम्॥
वगलामुखीमुच्चार्य वगलाबीजमुद्धरेत्॥ वाराहं शक्तिमुच्चार्य वाराहं तदनन्तरम्॥

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्रीं हुं फट्

वा·तं· वगलाबीजमुच्चार्य्य मौलं च समाचरेत्॥ त्रयश्चत्वारिंशद्वर्णमुक्तोयं वगलामनुः॥ दुर्वासा
५७ ऋषिरेवास्य छन्दोनुष्टुभमेव च॥ देवता वगलानाम्नी जगद्व्यापकरूपिणी॥ ग्लौं बीजं
च ह्रीं शक्तिश्च फट्कारः कीलकं तथा॥ मंत्रराजेन देव्याश्च न्यासविद्यां समाचरेत्॥ ध्या
नभेदं प्रवक्ष्यामि मंत्रभेदेन पुत्रक॥ चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम्॥ जिह्वां
परामिस्र खड्गं पानपात्रं गदां धारयतीं हराम्॥ पीतांबरधरां देवीं पीते[illegible]ताम्॥ विश्वोर्वी
विपाठः५ चारुवदनां मदाघूर्णितलोचनाम्॥ सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम्॥ भजेहं चा
न्यवगलां सर्वाकर्षणकर्मसु॥ एवं ध्यात्वा जपेन्मंत्रं बाणलक्षं कुमारक॥ तर्पयेत्त द्दशां राम:
शं च घृतसंमिश्रवारिणा॥ तद्दशांशं हुनेन्मुग्ध तालकं चाज्यसंयुतम्॥ भगाकारे सकु ५७

ष्ठेस्मिन्हं समुद्रेण बुद्धिमान् ॥ बदरीफलमात्रं वा प्याहुतिश्च कुमारक ॥ ब्राह्मणान्भोजयेत्पश्चात्स
हस्रं शतमेव वा ॥ योगिनीं पूजयेत्सुत द्रव्यशुद्धिसमन्वितम् ॥ मंत्रसिद्धिर्भवेत्तस्य देवताश्च प्र
सीदति ॥ शिवालये जपेन्मंत्रं अयुतं च सुबुद्धिमान् ॥ शत्रुरूपं भवेत्सद्यो नान्यथा शिवभा
षणम् ॥ षट्सहस्रं जपेन्मंत्रं निशायां चं ङिकालये ॥ जिह्वास्तंभनमाप्नोति बृ[illegible]ति समोपि वा ॥ जपेत्पंच
सहस्रं च भैरवस्य च सन्निधौ ॥ बुद्धिभ्रंशो भवेत्सद्यो वाणीपतिसमोपि वा ॥ वीरभद्रालये पुत्र
ह्ययुतं जपमाचरेत् ॥ सिद्धिदो जायते वत्स नान्यथा शिवभाषितम् ॥ मातृकासन्निधौ मंत्री ज
पेद्दशसहस्रकम् ॥ सद्यः स्तम्भनमाप्नोति वाल्मीकिसदृशोपि वा ॥ ध्यानपूर्वं जपेन्मंत्रं ह्ययुतं च
कुमारक ॥ रूपयौवनवान्स्यात्तु [illegible]धीवान्भवति ध्रुवम् ॥ त्रिसहस्रं जपेन्मंत्रं त्रिसहस्रं दिने दि

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सां.तं. ने ॥ मण्डलाच्छत्रुसंहारं कुबेरसदृशोपि वा ॥ ऐश्वर्यं नाशमाप्नोति कुबेरसदृशोपि वा ॥ त्रिकालमयुतं जप्त्वा ध्या
५८ नपूर्वं सुबुद्धिमान् ॥ बगलाध्यानतो मंत्रमयुतं जपमाचरेत् ॥ सर्वांगं वायुनाशं तु शीघ्रं गच्छेद्यमालयम् ॥
कावेरीसंनिधौ मंत्री जपेदयुतमादरात् ॥ नेत्रौ दृजा समायुक्तं नग्नो दक्षिणादिङ्मुखः ॥ अन्धो भव
ति न स्वसुरवस्पं क्रौंचभेदन ॥ विघ्नराजं समभ्यर्च्य रवौ तु जपमाचरेत् ॥ त्रिसहस्रं जपेन्मंत्रं कुक्षिरोगी
भवेद्रिपुः ॥ मण्डलान्नाशमाप्नोति नात्र कार्या विचारणा ॥ प्रयोगान्ते च संस्कारं पूजाकाले समा
चरेत् ॥ ॥ इति श्रीषड्विद्यागमे सांख्यायनतंत्रे द्वाविंशतिः पटलः ॥ ॥ स्वर्णसिंहासनासीनां
सुन्दरांगीं सुविस्मितां ताम् ॥ बिंबोष्ठीं चारुनयनां ध्यायेत्पीनपयोधराम् ॥ ॥ क्रौंचभेदन उ रामः
वाच ॥ ॥ नमस्ते पाण्डवत्रायतापत्रयहराय च ॥ बगलाख्यमहामंत्रप्रयोगान्वद शंकर ॥ ॥ ५८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईश्वर उवाच॥ त्रिकालेतु समासीनो ध्यानपूर्वंतु साधकः॥ त्रिसप्तमंत्रयित्वातु जपं पश्चात्समाचरेत्॥
नित्यंचत्रिसहस्रंतु षण्मासंविजितेन्द्रियः॥ वाचासिद्धिर्भवेत्तस्य शापानुग्रहकारिणी॥ तत्क्षणा
व्याधिनाशनंतु भवेदेव न संशयः॥ विभीतकतरोर्मूले प्ययुतं जपमाचरेत्॥ जिह्वास्तंभनमाप्नोति
साक्षाद्वागीश्वरोपि वा॥ कपित्थतरुमूले वा प्रजपेदयुतं तथा॥ श्रोत्रस्तम्भनमाप्नोति सद्यो वधिरतां
निं॰वः॰५ व्रजेत्॥ पिचुमर्दतरोर्मूले प्ययुतं जमाचरेत्॥ घ्राणस्तम्भनमाप्नोति रोगी च वत्सराद्भवेत्॥ कदली
मूलमाश्रित्य अयुतं जपमाचरेत्॥ पादस्तंभो भवेत्सद्यो वातरोगी भवेन्नरः॥ करंजमूलमाश्रि
५२ त्याप्ययुतं जमाचरेत्॥ स्तंभयेज्जठराग्निंतु अन्नद्वेषो भवेद्ध्रुवम्॥ विषतिन्दुकमूलंच समाश्रि
त्यमनुं जपेत्॥ अयुतञ्च भवेत्तत्र गात्रस्तंभनमाप्नुयात्॥ नद्यां समुद्रगामिन्यां नाभिदघ्नजले

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नरः ॥ तर्पयेद्बगलास्त्रेण ग्रस्तं कृत्वारिनामकम् ॥ दिने दिने सहस्रैकं बगला ध्यानपूर्वकम् ॥ गर्भस्रावं
भवेत्तस्य भार्यायाः शिवभाषितम् ॥ वल्मीपलाशमूले तु जपेदयुत संख्यया ॥ मंत्रमध्ये रिपोर्भार्यो
ग्रस्तं कृत्वा कुमारकं ॥ तर्पणं च दिवा कृत्वा रात्रौ रात्रौ जपेन्मनुम् ॥ सापि वंध्या भवेत्सत्यं नान्यथा
शिवभाषितम् ॥ श्मशाने प्रजपेन्मंत्रं ग्रस्तं कृत्वा तु पूर्ववत् ॥ सद्यस्फुटार्यनाशं च भवेद्देवन संश
यः ॥ शून्यागारे जपेद्देवमयुतं ध्यानपूर्वकम् ॥ लक्ष्मीर्नाशयते नूनं स शत्रुरवशिष्यते ॥ जंबी
रतरुमूले तु ह्ययुतं जपमाचरेत् ॥ भ्रमाकुलं कुलं सर्वं मण्डलान्नाशमाप्नुयात् ॥ शतवारं मंत्रि
तं च शर्करोदकमेव वा ॥ रिपुर्णां चैव दातव्यं जिह्वास्तंभनमाप्नुयात् ॥ द्विशतं मंत्रितं चैव नारि
केलफलं तथा ॥ पाययेद्बागिरिपुभिर्जिह्वां स्तंभनमाप्नुयात् ॥ नागवल्लीदलं चैव कर्मसु कंसू

र्णमेवच॥ सहस्रंमंत्रितंपुनर्दातव्यंशत्रुनाशनम्॥ तांबूलचर्वणाच्छत्रोर्जिह्वास्तंभनमाप्नुयात्॥ च
न्दनंचैवकस्तूरीघर्षितंमंत्रयेत्सुत॥ पुनश्चमंत्रयेत्ताम्रपात्रेगुणसहस्रकम्॥ तच्चन्दनलेपनेन
रिपुर्भग्नोभविष्यति॥ दंतधावनकाष्ठंचमंत्रयेत्त्रिसहस्रकम्॥ तत्काष्ठेनरिपोःपुत्रदन्तधाव
नमात्रतः॥ जिह्वांवाणीं बुद्धिंचक्षुत्रिपिपासादिकंतथा॥ स्तम्भनंचभवेच्छीघ्रंशिवस्यवच
नंयथा॥ प्रेतवस्त्रंरवौग्राह्यंशान्तमिश्रंचवेष्टयेत्॥ श्मशानेनिखनेद्रात्रौत्रिसहस्रंजपेत्सच
शेषभाषापतिःसाक्षाद्बृहस्पतिरपिस्वयम्॥ जिह्वास्तंभनमाप्नोतिसद्योमूकत्वमाप्नुयात्॥
इतिश्रीबगलामुख्यागमेसांख्यायनतंत्रेत्रयोविंशतिःपटलः॥ ॥ओंवांपीतांबराढ्यामरुणकु
सुमगंधानुलेपांत्रिनेत्रांगंभीरांकंबुकंठीकठिनकुचयुगांचारुबिंबाधरोष्ठीम्॥ शत्रोर्जिह्वां

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चपांकुशारधनुसहितां [illegible]कृगर्भाधिरूढां देवीं सैत्तं भक्तपांसु विरलारसनामंविकांतांनमामी॥
॥ ॥क्रौंचभेदनउवाच॥ ॥नमस्तेवृषभारूढनमःपन्नगभूषण॥लक्षणंवदमेदेववगला
मंत्रमालिकाम्॥ ॥ईश्वरउवाच॥ ॥भार्गवारेचसंग्राह्यमारमस्थनिवासिनम्॥आ
छकंसप्तरात्रंतुकृत्वागृतदनन्तरम्॥भूमावपिततंचैवकपिलागोमयंतथा॥पुनरेकक
राग्राह्यंभाण्डमध्येविनिःक्षिपेत्॥सर्पिषंजलसंमिश्रंकुर्यान्मेलनमेवच॥हरिद्रांतत्र
निःक्षिप्यवर्जयेदाकृत[illegible]नात[illegible]धोपरिविक्षिपेद्भांडंरवौरात्रौचनिःक्षिपेत्॥द्विगुणंजलसंयुक्तं
कुर्यान्मेलनमेवच॥अश्वत्थैरिंधनैरेवज्वालांकुर्या[illegible]त्तुबुद्धिमान्॥तस्मात्तदुभवेत्तावत्संचैनंसं
